# avadhUtAShTakam

# અવધૂતાષ્ટકં સ્વામીશુકદેવસ્તુતિઃ ચ

## Document Information

Text title : avadhUtAShTakam

File name : avadhUtAShTakam.itx

Category : aShTaka, deities_misc

Location : doc_deities_misc

Transliterated by : Subrahmanyam Yvs yvspmp at gmail.com

Proofread by : Subrahmanyam Yvs yvspmp at gmail.com, NA

Latest update : May 23, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# અવધૂતાષ્ટકં સ્વામીશુકદેવસ્તુતિઃ ચ

શ્રી પરમાત્મને નમઃ ॥

અથ પરમહંસ શિરોમણિ-અવધૂત-શ્રીસ્વામીશુકદેવસ્તુતિઃ
નિર્વાસનં નિરાકાઙ્ક્ષં સર્વદોષવિવર્જિતમ્ ।
નિરાલમ્બં નિરાતઙ્કં હ્યવધૂતં નમામ્યહમ્ ॥ ૧॥

નિર્મમં નિરહઙ્કારં સમલોષ્ટાશ્મકાઞ્ચનમ્ ।
સમદુઃખસુખં ધીરં હ્યવધૂતં નમામ્યહમ્ ॥ ૨॥

અવિનાશિનમાત્માનં હ્યેકં વિજ્ઞાય તત્ત્વતઃ ।
વીતરાગભયક્રોધં હ્યવધૂતં નમામ્યહમ્ ॥ ૩॥

નાહં દેહો ન મે દેહો જીવો નાહમહં હિ ચિત્ ।
એવં વિજ્ઞાય સન્તુષ્ટમ્ હ્યવધૂતં નમામ્યહમ્ ॥ ૪॥

સમસ્તં કલ્પનામાત્રં હ્યાત્મા મુક્તઃ સનાતનઃ ।
ઇતિ વિજ્ઞાય સન્તુષ્ટં હ્યવધૂતં નમામ્યહમ્ ॥ ૫॥

જ્ઞાનાગ્નિદગ્ધકર્માણં કામસઙ્કલ્પવર્જિતમ્ ।
હેયોપાદેયહીનં તં હ્યવધૂતં નમામ્યહમ્ ॥ ૬॥

વ્યામોહમાત્રવિરતૌ સ્વરૂપાદાનમાત્રતઃ ।
વીતશોકં નિરાયાસં હ્યવધૂતં નમામ્યહમ્ ॥ ૭॥

આત્મા બ્રહ્મેતિ નિશ્ચિત્ય ભાવાભાવૌ ચ કલ્પિતૌ ।
ઉદાસીનં સુખાસીનં હ્યવધૂતં નમામ્યહમ્ ॥ ૮॥

સ્વભાવેનૈવ યો યોગી સુખં ભોગં ન વાઞ્છતિ ।
યદૃચ્છાલાભસન્તુષ્ટં હ્યવધૂતં નમામ્યહમ્ ॥ ૯॥

નૈવ નિન્દાપ્રશંસાભ્યાં યસ્ય વિક્રિયતે મનઃ ।
આત્મક્રીડં મહાત્માનં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૦॥

નિત્યં જાગ્રદવસ્થાયાં સ્વપ્નવદ્યોઽવતિષ્ઠતે ।
નિશ્ચિન્તં ચિન્મયાત્માનં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૧॥

દ્વેષ્યં નાસ્તિ પ્રિયં નાસ્તિ નાસ્તિ યસ્ય શુભાશુભમ્ ।
ભેદજ્ઞાનવિહીનં તં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૨॥

જડં પશ્યતિ નો યસ્તુ જગત્ પશ્યતિ ચિન્મયમ્ ।
નિત્યયુક્તં ગુણાતીતં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૩॥

યો હિ દર્શનમાત્રેણ પવતે ભુવનત્રયમ્ ।
પાવનં જઙ્ગમં તીર્થં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૪॥

નિષ્કલં નિષ્ક્રિયં શાન્તં નિર્મલં પરમામૃતમ્ ।
અનન્તં જગદાધારં હ્યવધૂતં નમામ્યહમ્ ॥ ૧૫॥

॥ ઇતિ અવધૂતાષ્ટકં સમાપ્તમ્ ॥

Encoded and proofread by Subrahmanyam Yvs yvspmp at gmail.com, NA

*avadhUtAShTakam*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*